# Rasāla

www.rasalabooks.com
A303 Raheja Regent, 35 Coles Road, Fraser Town,
Bangalore, 560 005
+91 997230 5440 | venetia@rasalabooks.com

महोदय/महोदये

नमस्काराः

रसालाख्यं नूतनसंस्कृतप्रकाशनं भारतवर्षस्यादृष्टपूर्वाणि विस्मृतानि सुन्दरतमानि च काव्यान्यांग्लभाषायानूद्य प्रकाशयति। भवतां छात्रा आचर्याः संशोधकाः संस्कृतप्रियाः सुहृदयाश्च रसालप्रकाशनस्य पद्यावल्याः कृते स्वरचितानि पद्यान्यन्येषां कवीनां च पद्यानि प्रेषयेयुरित्यस्माकं सविनया प्रार्थना। अस्याः पद्यावल्याः 'शर्वरी'ति नाम अस्माभिर्दत्तम्।

भवद्भिः स्वसंस्थायामधोलिखिता सूचनोद्घोष्यतामित्येषास्माकं प्रार्थना। अस्ति चेत् किमपि प्रष्टव्यं कृपयोपरिष्टात् सूचितायां दुरवाणीसंख्यायामस्माकं सम्पर्कं करोतु।

धन्यवादः

शुभमस्तु

वनीश्या कोटमराजु

शङ्कर राजरामन्

## सूचना

रसालाख्यं नूतनसंस्कृतप्रकाशनं भारतवर्षस्यादृष्टपूर्वाणि विस्मृतानि सुन्दरतमानि च काव्यान्यांग्लभाषायानूद्य प्रकाशयति। भवन्तो रसालप्रकाशनस्य पद्यावल्याः कृते स्वरचितानि पद्यान्यन्येषां कवीनां (प्राक्तनानामधुनातनानां वा) च पद्यानि प्रेषयेयुरित्यस्माकं सविनया प्रार्थना। अस्याः पद्यावल्याः 'शर्वरी'ति नाम अस्माभिर्दत्तम्।

पद्यानि रात्रिसम्बद्धानि भवितुमर्हन्ति – यथा सुर्यास्तचन्द्रोदयतिमिरादीनां वर्णनम्, रात्रौ कामिनोः समागमः, कुमुदादीनां विकास इत्यादि। पद्यानि रसमयानि अलङ्कारचमत्कारयुक्तानि भवेयुः। यथाशक्ति नीत्युपदेशसहितानि पद्यानि वर्जनीयानि।

venetia@rasalabooks.com प्रति पद्यानि प्रेषयेयुः | अथवा Rasāla, A303 Raheja Regent, 35 Coles Road, Fraser Town, Bangalore 560 005. Phone: +91 997230 5440 प्रति पद्यानि प्रेषयेयुः | स्वसन्देशपत्रे नामसङ्केतसम्पर्काणां सूचना दातव्या। कवेर्नामाद्यपि तत्रैव दातव्यम्।

एतेषां प्रेषितानां पद्यानां मध्ये १०८ उत्तमानि पद्यानि शर्वरीनाम्न्यां रसालपद्यावल्यां प्रकाशितानि भविष्यन्ति। येषां पद्यानि पुस्तकार्थं चितानि तेषां नामाद्यपि पुस्तके लिखितं भविष्यति। तेभ्यः पुस्तकमेकमपि दीयते। यानि पद्यानि पुस्तकार्थं न चितानि, तान्यपि रसालप्रकाशनस्य अन्तर्जालस्थाने प्रकाशिष्यन्ते।

इतोऽपि विज्ञप्तिप्राप्तये www.rasalabooks.com कृपया पश्यतु।